द्भुतानां कृष्णस्तोत्रनिरूपणम्। शिवशम्भुसमायोगो दधीच्याख्यानकन्ततः। भस्ममाहात्म्यमतुलं शिवमाहात्म्यमुत्तमम्। देवरातसुताख्यानं पुराणज्ञ प्रशंसनम्। गौतमाख्यानकञ्चैव शिवगीता ततः स्मृता। कल्पान्तरी रामकथा भारद्वाजाश्रमस्थितौ। पातालखण्डमेतद्धि शृण्वतां ज्ञानिनां सदा। सर्वपापप्रशमनं सर्वाभीष्टफलप्रदम्"। पञ्चमे उत्तरखण्डे "पर्वताख्यानकं पूर्वं गौर्य्यै प्रोक्तं शिवेन वै। जालन्धरकथा पश्चात् श्रीशैलाद्यनुकीर्त्तनम्। सागरस्य कथा पुण्या ततःपरमुदीरिता। गङ्गाप्रयागकाशीनां गयायाश्चाधिपुण्यकम्। आम्रादिदानमाहात्म्यं तन्महाद्वादशीव्रतम्। चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम्। विष्णुधर्मसमाख्यानं विष्णुनामसहस्रकम्। कार्त्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः। जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम्। साभ्रमत्याश्च माहात्म्यं नृसिंहोत्पत्तिवर्णनम्। देवशर्मादिकाख्यानं गीतामाहात्म्यवर्णने। भक्ताख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य ह। इन्द्रप्रस्थस्य माहात्म्यं बहुतीर्थकथाचितम्। मन्त्ररत्नाभिधानञ्च त्रिपाद्भूत्यनुवर्णनम्। अवतारकथा पुण्या मत्स्यादीनामतःपरम्। रामनामशतं दिव्यं तन्माहात्म्यञ्च वाडव!। परीक्षणञ्च भृगुणा श्रीविष्णोर्वैभवस्य च। इत्येतदुत्तरं खण्डं पञ्चमं सर्वपुण्यदम्" तत्फलश्रुतिः "पञ्चखण्डयुतं पाद्मं यः शृणोति नरोत्तमः। स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान्। एतद्वै पञ्चपञ्चाशत्सहस्रं पद्मसंज्ञकम्। पुराणं लेखयित्वा वै ज्यैष्ठ्यां स्वर्णाब्जसंयुतम्। यः प्रदद्यात् सुमतये पुराणज्ञाय मानदः। स याति वैष्णवं धाम सर्वदेवनमस्कृतः। पद्मानुक्रमणीमेतां यः पठेत् शृणुयात् तथा। सोऽपि पद्मपुराणस्य लभेत् श्रवणजं फलम्"।

**पद्मपुष्प** पु० पद्ममिव पुष्पमस्य। १कर्णिकारवृक्षे २पिकाङ्गपक्षिभेदे पुंस्त्री० शब्दच०। स्त्रियां ङीष्।

**पद्मप्रभ** त्रि० पद्मस्येव प्रभा यस्य। १कमलसदृशप्रभान्विते २जैनभेदे पु० हेमच०। [मनसादेव्यां शब्दच०।

**पद्मप्रिया** स्त्री पद्मं प्रियं यस्याः। जरत्कारुमुनिपत्न्यां

**पद्मबन्ध** पु० चित्रालङ्कारभेदे अलङ्कारशब्दे २६०पृ० दृश्यम्।

**पद्मबन्धु** पु० ६त०। १सूर्ये शब्दरत्ना० २अर्कवृक्षे च ३भ्रमरे शब्दच०।

**पद्मभू** पु० पद्मात् विष्णुनाभिकमलात् भवति भू–क्विप्। चतुर्मुखे ब्रह्मणि हला०। पद्मगर्भशब्दे दृश्यम्।

**पद्ममुख** त्रि० पद्ममिव मुखमस्य। १कमलसदृशमुखयुते स्त्रियां वा ङीष्। सा च २दूर्वालतायां शब्दच०।

**पद्ममुद्रा** स्त्री "हस्तौ तु सम्मुखौ कृत्वा तदधःप्रोथिताङ्गुली। तलान्तर्मिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका" तन्त्रसारोक्ते मुद्राभेदे [चतुर्मुखे अमरः।

**पद्मयोनि** पु० पद्मं विष्णुनाभिकमलं योनिरस्य। ब्रह्मणि

**पद्मराग** न० पद्मस्येव रागोऽस्य। रक्तवर्णमणिभेदे तल्लक्षणादि वृ०सं० ४० उक्तं यथा "सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः। सौगन्धिकजा भ्रमराञ्जनाब्जजम्बुरसद्युतयः। कुरुविन्दभवाः शबला मन्दद्युतयश्च धातुभिर्विद्धाः। स्फटिकभवा द्युतिमन्तो नानावर्णा विशुद्धाश्च। स्निग्धः प्रभानुलेपी स्वच्छोऽर्चिष्मान् गुरुः सुसंस्थानः। अन्तःप्रभोऽतिरागो मणिरत्नगुणाः समस्तानाम्। कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खण्डाः। दुर्विद्धा न मनोज्ञाः सशर्कराश्चेति मणिदोषाः। भ्रमरशिखिकण्ठवर्णो दीपशिखासप्रभो भुजङ्गानाम्। भवति मणिः किल मूर्धनि योऽनर्घ्यो वै स विज्ञेयः। यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य दोषा भवन्ति विषरोगकृताः कदाचित्। राष्ट्रे च नित्यमभिवर्षति तस्य देवः शत्रूंश्च नाशयति तस्य मणेः प्रभावात्। षड्विंशतिः सहस्राण्येकस्य मणेः पलप्रमाणस्य। कर्षत्रयस्य विंशतिरुपदिष्टा पद्मरागस्य। अर्द्धपलस्य द्वादश कर्षस्यैकस्य षट् सहस्राणि। यच्चाष्टमाषकजितं तस्य सहस्रत्रयं मूल्यम्। माषकचतुष्टयं दशशतक्रयं द्वौ तु पञ्चशतमूल्यौ। परिकल्प्यमन्तराले मूल्यं हीनाधिकगुणानाम्। वर्णन्यूनस्यार्धं तेजोहीनस्य मूल्यमष्टांशः। अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम्। आधूम्रं व्रणबहुलं स्वल्पगुणं चाप्नुयाद्द्विशभागम्। इति पद्मरागमूल्यं पूर्वाचार्य्यैः समुद्दिष्टम्"। युक्तिकल्पतरौ चात्रविशेषो यथा "सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम्। पीतं काष्ठपुरोद्भूतं कुरुविन्दमिति स्मृतम्। अशोकपल्लवच्छायमस्तु सौगन्धिकं विदुः। तुम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम्। उत्तमं सिंहलोद्भूतं निकृष्टं तु तुम्बुरोद्भवम्। मध्यमं मध्यजं ज्ञेयं माणिक्यं स्थलभेदतः" तथा "बन्धूकगुञ्जाशकलेन्द्रगोपजवासनाङ्कुर